Visit **Dwarkadheeshvastu.com** For

**FREE** Vastu Consultancy, Music, Epics, Devotional Videos
Educational Books, Educational Videos, Wallpapers

****

All Music is also available in **CD** format. **CD Cover** can also be print with your Firm Name

****

We also provide this whole Music and Data in **PENDRIVE** and **EXTERNAL HARD DISK.**

Contact : Ankit Mishra ( +91-8010381364, dwarkadheeshvastu@gmail.com )

# SHRI GANESH SEHSTRNAAM STOTRAM-SANSKRIT

॥ श्रीहरिः ॥

# संक्षिप्त प्रयोग-विधि

सर्वप्रथम स्नान आदिसे पवित्र हो जाय। जब सहस्रनामस्तोत्रका पाठ करना हो अथवा सहस्रार्चन करना हो, श्रीगणेशजीकी प्रतिमाको अपने सम्मुख किसी काष्ठपीठ आदिपर यथाविधि स्थापित कर ले, अपने बैठनेका आसन भी लगा ले। पूजन आदिकी सभी सामग्रियोंको यथास्थान रखकर अपने आसनपर पूर्वाभिमुख या उत्तराभिमुख बैठ जाय। दीपक जलाकर पूर्वाभिमुख रख दे और हाथ धो ले। **'दीपज्योतिर्नमोऽस्तु ते'** कहकर पुष्प अर्पितकर कर्मसाक्षी दीपकका पूजन कर ले। तिलक लगा ले तथा निम्न मन्त्रोंसे आचमन करे—

**'ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः।'**

तथा '**ॐ हृषीकेशाय नमः**' कहकर हाथ धो ले।

निम्न मन्त्रसे अपने ऊपर जल छिड़ककर मार्जन कर ले—

**ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।**
**यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥**

**ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु।**

तदनन्तर दाहिने हाथमें जल, पुष्प तथा अक्षत लेकर निम्न संकल्प करे—

**ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशे ""नगरे/ग्रामे ""वैक्रमाब्दे**

""संवत्सरे ""मासे ""पक्षे ""तिथौ ""वासरे ""गोत्रः शर्मा/वर्मा/गुप्तोऽहं श्रीगणेशप्रीत्यर्थं* सहस्रनामस्तोत्रपाठं करिष्ये। (यदि सहस्रार्चन करना हो तो 'सहस्रनामार्चनं करिष्ये'—ऐसा बोलना चाहिये।)

हाथका जलाक्षत छोड़ दे।

अर्चन-पूजनके समय श्रीगणेशजीके विनियोगका मन्त्र पढ़कर जल छोड़ना चाहिये तथा न्यास करना चाहिये। विनियोग और न्यासके मन्त्र स्तोत्रके प्रारम्भमें लिखे गये हैं।

---

* अगर किसी कामनाकी सिद्धिके लिये सहस्रार्चन करना हो तो संकल्पमें 'यथेप्सितकार्यसिद्धिद्वारा श्रीगणेशप्रीत्यर्थं यथालब्धोपचारैः पूजनपूर्वकं ""द्रव्यैः सहस्रार्चनं करिष्ये'—ऐसी योजना कर ले।

इसके अनन्तर श्रीगणेशजीका ध्यान, जो स्तोत्रके साथ दिया गया है, उससे भक्तिभावपूर्वक श्रीगणेशजीके स्वरूपका ध्यान करना चाहिये तथा मन्त्रोंसे पञ्चोपचार या मानस-पूजन करके स्तोत्रका पाठ करना चाहिये—

**मानस-पूजन—**

**१-ॐ लं पृथिव्यात्मकं गन्धं परिकल्पयामि।**

(प्रभो! मैं पृथिवीरूप गन्ध (चन्दन) आपको अर्पित करता हूँ।)

**२-ॐ हं आकाशात्मकं पुष्पं परिकल्पयामि।**

(प्रभो! मैं आकाशरूप पुष्प आपको अर्पित करता हूँ।)

**३-ॐ यं वाय्वात्मकं धूपं परिकल्पयामि।**

(प्रभो! मैं वायुदेवके रूपमें धूप आपको प्रदान करता हूँ।)

**४-ॐ रं वह्न्यात्मकं दीपं दर्शयामि।**

(प्रभो! मैं अग्निदेवके रूपमें दीपक आपको प्रदान करता हूँ।)

**५-ॐ वं अमृतात्मकं नैवेद्यं निवेदयामि।**

(प्रभो! मैं अमृतके समान नैवेद्य आपको निवेदन करता हूँ।)

**६-ॐ सौं सर्वात्मकं सर्वोपचारं समर्पयामि।**

(प्रभो! मैं सर्वात्माके रूपमें संसारके सभी उपचारोंको आपके चरणोंमें समर्पित करता हूँ।)

**सहस्रार्चन करते समय उपलब्ध सामग्रियोंसे षोडशोपचार या पञ्चोपचार-**

पूजन करना चाहिये, तदनन्तर सहस्रनामावलीके प्रत्येक नाममन्त्रसे सामग्री गणेशजीपर चढ़ाये। स्त्रियों तथा जिनका यज्ञोपवीत नहीं हुआ है, उन्हें प्रत्येक नामके पहले '**ॐ**' के स्थानपर '**श्री**' शब्दका प्रयोग करना चाहिये, जैसे— '**श्रीगणेश्वराय नमः।**' अन्तमें आरती, पुष्पाञ्जलि तथा क्षमा-प्रार्थना करके अर्चनको पूर्ण करे।

श्रीहरि:

# श्रीगणेशसहस्त्रनामस्तोत्रम्

श्रीगणेशाय नम:

ॐ अस्य श्रीगणपतिगकारादिसहस्त्रनाम-मालामन्त्रस्य दुर्वासा ऋषि:, अनुष्टुप् छन्द:, श्रीगणपतिर्देवता, गं बीजम्, स्वाहा शक्ति:, ग्लौं कीलकम्, मम सकलाभीष्टसिद्ध्यर्थे जपे विनियोग: ॥

ॐ अङ्गुष्ठाभ्यां नम:, श्रीं तर्जनीभ्यां नम:, ह्रीं

मध्यमाभ्यां नमः, क्रौं अनामिकाभ्यां नमः, ग्लौं कनिष्ठिकाभ्यां नमः, गं करतलकरपृष्ठाभ्यां नमः। एवं हृदयादिः॥ अथवा षड्दीर्घभाजागमितिबीजेन कराङ्गन्यासः॥

### ध्यानम्

**ध्यायेन्नित्यं गणेशं परमगुणयुतं ध्यानसंस्थं त्रिनेत्र-**
**मेकं देवं त्वनेकं परमरुचियुतं देवदेवं प्रसन्नम्।**

शुण्डादण्डाढ्यगण्डोद्गलितमदजलोल्लोलमत्तालिजालं
श्रीमन्तं विघ्नराजं सकलसुखकरं श्रीगणेशं नमामि ॥

॥ अथ स्तोत्रम् ॥

ॐ गणेश्वरो गणाध्यक्षो गणाराध्यो गणप्रियः ।
गणनाथो गणस्वामी गणेशो गणनायकः ॥ १ ॥

गणमूर्तिर्गणपतिर्गणत्राता गणञ्जयः ।
गणपोऽथ गणक्रीडो गणदेवो गणाधिपः ॥ २ ॥

गणज्येष्ठो गणश्रेष्ठो गणप्रेष्ठो गणाधिराट्।
गणराड् गणगोप्ताथ गणाङ्गो गणदैवतम् ॥ ३ ॥

गणबन्धुर्गणसुहृद् गणाधीशो गणप्रथः।
गणप्रियसखः शश्वद् गणप्रियसुहृत्तथा ॥ ४ ॥

गणप्रियरतो नित्यं गणप्रीतिविवर्द्धनः।
गणमण्डलमध्यस्थो गणकेलिपरायणः ॥ ५ ॥

गणाग्रणीर्गणेशानो गणगीतो गणोच्छ्रयः।
गण्यो गणहितो गर्जद्गणसेनो गणोद्धतः॥ ६॥

गणभीतिप्रमथनो गणभीत्यपहारकः।
गणनार्हो गणप्रौढो गणभर्ता गणप्रभुः॥ ७॥

गणसेनो गणचरो गणप्राज्ञो गणैकराट्।
गणाग्र्यो गणनामा च गणपालनतत्परः॥ ८॥

गणजिद् गणगर्भस्थो गणप्रवणमानसः ।
गणगर्वपरीहर्ता गणो गणनमस्कृतः ॥ ९ ॥

गणार्चिताङ्घ्रियुगलो गणरक्षणकृत् सदा ।
गणध्यातो गणगुरुर्गणप्रणयतत्परः ॥ १० ॥

गणागणपरित्राता गणाधिहरणोद्धुरः ।
गणसेतुर्गणनुतो गणकेतुर्गणाग्रगः ॥ ११ ॥

गणहेतुर्गणग्राही गणानुग्रहकारकः।
गणागणानुग्रहभूर्गणागणवरप्रदः ॥ १२ ॥

गणस्तुतो गणप्राणो गणसर्वस्वदायकः।
गणवल्लभमूर्तिश्च गणभूतिर्गणेष्टदः ॥ १३ ॥

गणसौख्यप्रदाता च गणदुःखप्रणाशनः।
गणप्रथितनामा च गणाभीष्टकरः सदा ॥ १४ ॥

गणमान्यो गणख्यातो गणवीतो गणोत्कटः।
गणपालो गणवरो गणगौरवदायकः॥ १५ ॥

गणगर्जितसंतुष्टो गणस्वच्छन्दगः सदा।
गणराजो गणश्रीदो गणाभयकरः क्षणात्॥ १६ ॥

गणमूर्द्धाभिषिक्तश्च गणसैन्यपुरस्सरः।
गुणातीतो गुणमयो गुणत्रयविभागकृत्॥ १७॥

गुणी गुणाकृतिधरो गुणशाली गुणप्रियः।
गुणपूर्णो गुणाम्भोधिर्गुणभाग् गुणदूरगः॥ १८॥

गुणागुणवपुर्गौणशरीरो गुणमण्डितः।
गुणस्त्रष्टा गुणेशानो गुणेशोऽथ गुणेश्वरः॥ १९॥

गुणसृष्टजगत्संघो गुणसंघो गुणैकराट्।
गुणप्रवृष्टो गुणभूर्गुणीकृतचराचरः॥ २०॥

गुणप्रवणसंतुष्टो गुणहीनपराङ्मुखः।
गुणैकभूर्गुणश्रेष्ठो गुणज्येष्ठो गुणप्रभुः॥ २१ ॥

गुणज्ञो गुणसम्पूज्यो गुणैकसदनं सदा।
गुणप्रणयवान् गौणप्रकृतिर्गुणभाजनम्॥ २२ ॥

गुणिप्रणतपादाब्जो गुणिगीतो गुणोज्ज्वलः।
गुणवान् गुणसम्पन्नो गुणानन्दितमानसः॥ २३ ॥

गुणसंचारचतुरो गुणसंचयसुन्दरः ।
गुणगौरो गुणाधारो गुणसंवृतचेतनः ॥ २४ ॥

गुणकृद् गुणभृन्नित्यं गुणाग्र्यो गुणपारदृक् ।
गुणप्रचारी गुणयुग् गुणागुणविवेककृत् ॥ २५ ॥

गुणाकरो गुणकरो गुणप्रवणवर्द्धनः ।
गुणगूढचरो गौणसर्वसंसारचेष्टितः ॥ २६ ॥

गुणदक्षिणसौहार्दो गुणलक्षणतत्त्ववित्।
गुणहारी गुणकलो गुणसङ्घसखः सदा ॥ २७ ॥

गुणसंस्कृतसंसारो गुणतत्त्वविवेचकः।
गुणगर्वधरो गौणसुखदुःखादयो गुणः ॥ २८ ॥

गुणाधीशो गुणलयो गुणवीक्षणलालसः।
गुणगौरवदाता च गुणदाता गुणप्रदः ॥ २९ ॥

गुणकृद्गुणसम्बन्धो गुणभृद्गुणबन्धनः।
गुणहृद्यो गुणस्थायी गुणदायी गुणोत्कटः॥ ३०॥

गुणचक्रधरो गौणावतारो गुणबान्धवः।
गुणबन्धुर्गुणप्रज्ञो गुणप्राज्ञो गुणालयः॥ ३१॥

गुणधाता गुणप्राणो गुणगोपो गुणाश्रयः।
गुणयायी गुणाधायी गुणको गुणपालकः॥ ३२॥

गुणाहततनुर्गौणो गीर्वाणो गुणगौरवः ।
गुणवत्पूजितपदो गुणवत्प्रीतिदायकः ॥ ३३ ॥

गुणवद्गीतकीर्तिश्च गुणवद्बद्धसौहृदः ।
गुणवद्वरदो नित्यं गुणवत्प्रतिपालकः ॥ ३४ ॥

गुणवद्गुणसंतुष्टो गुणवद्रचितस्तवः ।
गुणवद्रक्षणपरो गुणवत्प्रणयप्रियः ॥ ३५ ॥

गुणवच्चक्रसंचारो गुणवत्कीर्तिवर्द्धनः ।
गुणवद्गुणचित्तस्थो गुणवद्गुणरक्षकः ॥ ३६ ॥

गुणवत्पोषणकरो गुणवच्छत्रुसूदनः ।
गुणवत्सिद्धिदाता च गुणवद्गौरवप्रदः ॥ ३७ ॥

गुणवत्प्रवणस्वान्तो गुणवद्गुणभूषणः ।
गुणवत्कुलविद्वेषिविनाशकरणक्षमः ॥ ३८ ॥

गुणिस्तुतगुणो गर्जत्प्रलयाम्बुदनिःस्वनः ।
गजो गजपतिर्गर्जद्गजयुद्धविशारदः ॥ ३९ ॥

गजास्यो गजकर्णोऽथ गजराजो गजाननः ।
गजरूपधरो गर्जद्गजयूथोद्धुरध्वनिः ॥ ४० ॥

गजाधीशो गजाधारो गजासुरजयोद्धुरः ।
गजदन्तो गजवरो गजकुम्भो गजध्वनिः ॥ ४१ ॥

गजमायो गजमयो गजश्रीर्गजगर्जितः ।
गजामयहरो नित्यं गजपुष्टिप्रदायकः ॥ ४२ ॥

गजोत्पत्तिर्गजत्राता गजहेतुर्गजाधिपः ।
गजमुख्यो गजकुलप्रवरो गजदैत्यहा ॥ ४३ ॥

गजकेतुर्गजाध्यक्षो गजसेतुर्गजाकृतिः ।
गजवन्द्यो गजप्राणो गजसेव्यो गजप्रभुः ॥ ४४ ॥

गजमत्तो गजेशानो गजेशो गजपुङ्गवः ।
गजदन्तधरो गुञ्जन्मधुपो गजवेषभृत् ॥ ४५ ॥

गजच्छन्नो गजाग्रस्थो गजयायी गजाजयः ।
गजराड् गजयूथस्थो गजगञ्जकभञ्जकः ॥ ४६ ॥

गर्जितोज्झितदैत्यासुर्गर्जितत्रातविष्टपः ।
गानज्ञो गानकुशलो गानतत्त्वविवेचकः ॥ ४७ ॥

गानश्लाघी गानरसो गानज्ञानपरायणः ।
गानागमज्ञो गानाङ्गो गानप्रवणचेतनः ॥ ४८ ॥

गानकृद्गानचतुरो गानविद्याविशारदः ।
गानध्येयो गानगम्यो गानध्यानपरायणः ॥ ४९ ॥

गानभूर्गानशीलश्च गानशाली गतश्रमः ।
गानविज्ञानसम्पन्नो गानश्रवणलालसः ॥ ५० ॥

गानयत्तो गानमयो गानप्रणयवान् सदा।
गानध्याता गानबुद्धिर्गानोत्सुकमना: पुन: ॥५१॥

गानोत्सुको गानभूमिर्गानसीमा गुणोज्ज्वल:।
गानाङ्गज्ञानवान् गानमानवान् गानपेशल: ॥५२॥

गानवत्प्रणयो गानसमुद्रो गानभूषण:।
गानसिन्धुर्गानपरो गानप्राणो गणाश्रय: ॥५३॥

गानैकभूर्गानहृष्टो गानचक्षुर्गणैकदृक्।
गानमत्तो गानरुचिर्गानविद्गानवित्प्रियः ॥ ५४ ॥

गानान्तरात्मागानाढ्यो गानभ्राजत्सभः सदा।
गानमायो गानधरो गानाविद्याविशोधकः ॥ ५५ ॥

गानाहितघ्नो गानेन्द्रो गानलीनो गतिप्रियः।
गानाधीशो गानलयो गानाधारो गतीश्वरः ॥ ५६ ॥

गानवन्मानदो गानभूतिर्गानैकभूतिमान् ।
गानतानततो गानतानदानविमोहितः ॥ ५७ ॥

गुरुर्गुरूदरश्रोणिर्गुरुतत्त्वार्थदर्शनः ।
गुरुस्तुतो गुरुगुणो गुरुमायो गुरुप्रियः ॥ ५८ ॥

गुरुकीर्तिर्गुरुभुजो गुरुवक्षा गुरुप्रभः ।
गुरुलक्षणसम्पन्नो गुरुद्रोहपराङ्मुखः ॥ ५९ ॥

गुरुविद्यो गुरुप्राणो गुरुबाहुबलोच्छ्रयः।
गुरुदैत्यप्राणहरो गुरुदैत्यापहारकः ॥ ६० ॥

गुरुगर्वहरो गुह्यप्रवरो गुरुदर्पहा।
गुरुगौरवदायी च गुरुभीत्यपहारकः ॥ ६१ ॥

गुरुशुण्डो गुरुस्कन्धो गुरुजङ्घो गुरुप्रथः।
गुरुभालो गुरुगलो गुरुश्रीर्गुरुगर्वनुत् ॥ ६२ ॥

गुरूरुर्गुरुपीनांसो गुरुप्रणयलालसः।
गुरुमुख्यो गुरुकुलस्थायी गुरुगुणः सदा ॥ ६३ ॥
गुरुसंशयभेत्ता च गुरुमानप्रदायकः।
गुरुधर्मसदाराध्यो गुरुधर्मनिकेतनः ॥ ६४ ॥
गुरुदैत्यकुलच्छेत्ता गुरुसैन्यो गुरुद्युतिः ॥ ६५ ॥
गुरुधर्माग्रगण्योऽथ गुरुधर्मधुरन्धरः।
गरिष्ठो गुरुसंतापशमनो गुरुपूजितः ॥ ६६ ॥

गुरुधर्मधरो गौरधर्माधारो गदापहः ।
गुरुशास्त्रविचारज्ञो गुरुशास्त्रकृतोद्यमः ॥ ६७ ॥

गुरुशास्त्रार्थनिलयो गुरुशास्त्रालयः सदा ।
गुरुमन्त्रो गुरुश्रेष्ठो गुरुमन्त्रफलप्रदः ॥ ६८ ॥

गुरुस्त्रीगमनोद्दामप्रायश्चित्तनिवारकः ।
गुरुसंसारसुखदो गुरुसंसारदुःखभित् ॥ ६९ ॥

गुरुश्लाघापरो गौरभानुखण्डावतंसभृत्।
गुरुप्रसन्नमूर्तिश्च गुरुशापविमोचकः ॥ ७० ॥

गुरुकान्तिर्गुरुमयो गुरुशासनपालकः।
गुरुतन्त्रो गुरुप्रज्ञो गुरुभो गुरुदैवतम् ॥ ७१ ॥

गुरुविक्रमसंचारो गुरुदृग् गुरुविक्रमः।
गुरुक्रमो गुरुप्रेष्ठो गुरुपाखण्डखण्डकः ॥ ७२ ॥

गुरुगर्जितसम्पूर्णब्रह्माण्डो गुरुगर्जितः ।
गुरुपुत्रप्रियसखो गुरुपुत्रभयापहः ॥ ७३ ॥

गुरुपुत्रपरित्राता गुरुपुत्रवरप्रदः ।
गुरुपुत्रार्तिशमनो गुरुपुत्राधिनाशनः ॥ ७४ ॥

गुरुपुत्रप्राणदाता गुरुभक्तिपरायणः ।
गुरुविज्ञानविभवो गौरभानुवरप्रदः ॥ ७५ ॥

गौरभानुस्तुतो गौरभानुत्रासापहारकः ।
गौरभानुप्रियो गौरभानुगौंरववर्द्धनः ॥ ७६ ॥

गौरभानुपरित्राता गौरभानुसखः सदा ।
गौरभानुप्रभुगौंरभानुभीतिप्रणाशनः ॥ ७७ ॥

गौरीतेजःसमुत्पन्नो गौरीहृदयनन्दनः ।
गौरीस्तनन्धयो गौरीमनोवाञ्छितसिद्धिकृत् ॥ ७८ ॥

गौरो गौरगुणो गौरप्रकाशो गौरभैरवः ।
गौरीशनन्दनो गौरीप्रियपुत्रो गदाधरः ॥ ७९ ॥

गौरीवरप्रदो गौरीप्रणयो गौरसच्छविः ।
गौरीगणेश्वरो गौरीप्रवणो गौरभावनः ॥ ८० ॥

गौरात्मा गौरकीर्तिश्च गौरभावो गरिष्ठदृक् ।
गौतमो गौतमीनाथो गौतमीप्राणवल्लभः ॥ ८१ ॥

गोसहस्रो गोपवरो गोपगोपीसुखावहः।
गोवर्द्धनो गोपगोपो गोपो गोकुलवर्द्धनः॥ ८५॥

गोचरो गोचराध्यक्षो गोचरप्रीतिवृद्धिकृत्।
गोमी गोकष्टसंत्राता गोसंतापनिवर्तकः॥ ८६॥

गोष्ठो गोष्ठाश्रयो गोष्ठपतिर्गोधनवर्द्धनः।
गोष्ठप्रियो गोष्ठमयो गोष्ठामयनिवर्तकः॥ ८७॥

गोलोको गोलको गोभृद् गोभर्ता गोसुखावहः ।
गोधुग् गोधुग्गणप्रेष्ठो गोदोग्धा गोमयप्रियः ॥ ८८ ॥

गोत्रं गोत्रपतिर्गोत्रप्रभुर्गोत्रभयापहः ।
गोत्रवृद्धिकरो गोत्रप्रियो गोत्रार्तिनाशनः ॥ ८९ ॥

गोत्रोद्धारपरो गोत्रप्रवरो गोत्रदैवतम् ।
गोत्रविख्यातनामा च गोत्री गोत्रप्रपालकः ॥ ९० ॥

गोत्रसेतुर्गोत्रकेतुर्गोत्रहेतुर्गतक्लमः ।
गोत्रत्राणकरो गोत्रपतिर्गोत्रेशपूजितः ॥ ९१ ॥

गोत्रभिद् गोत्रभित्त्राता गोत्रभिद्वरदायकः ।
गोत्रभित्पूजितपदो गोत्रभिच्छत्रुसूदनः ॥ ९२ ॥

गोत्रभित्प्रीतिदो नित्यं गोत्रभिद्गोत्रपालकः ।
गोत्रभिद्गीतचरितो गोत्रभिद्राज्यरक्षकः ॥ ९३ ॥

गोत्रभिज्जयदायी च गोत्रभित्प्रणयः सदा।
गोत्रभिद्भयसम्भेत्ता गोत्रभिन्मानदायकः॥ ९४॥

गोत्रभिद्गोपनपरो गोत्रभित्सैन्यनायकः।
गोत्राधिपप्रियो गोत्रपुत्रीपुत्रो गिरिप्रियः॥ ९५॥

ग्रन्थज्ञो ग्रन्थकृद् ग्रन्थग्रन्थिभिद् ग्रन्थविघ्नहा।
ग्रन्थादिर्ग्रन्थसंचारो ग्रन्थश्रवणलोलुपः॥ ९६॥

ग्रन्थाधीनक्रियोग्रन्थप्रियो ग्रन्थार्थतत्त्ववित्।
ग्रन्थसंशयसंछेदी ग्रन्थवक्ता ग्रहाग्रणीः॥ १७॥

ग्रन्थगीतगुणो ग्रन्थगीतो ग्रन्थादिपूजितः।
ग्रन्थारम्भस्तुतो ग्रन्थग्राही ग्रन्थार्थपारदृक्॥ १८॥

ग्रन्थदृग् ग्रन्थविज्ञानो ग्रन्थसंदर्भशोधकः।
ग्रन्थकृत्पूजितो ग्रन्थकरो ग्रन्थपरायणः॥ १९॥

ग्रन्थपारायणपरो ग्रन्थसंदेहभञ्जकः ।
ग्रन्थकृद्वरदाता च ग्रन्थकृद्वन्दितः सदा ॥ १०० ॥

ग्रन्थानुरक्तो ग्रन्थज्ञो ग्रन्थानुग्रहदायकः ।
ग्रन्थान्तरात्मा ग्रन्थार्थपण्डितो ग्रन्थसौहृदः ॥ १०१ ॥

ग्रन्थपारङ्गमो ग्रन्थगुणविद् ग्रन्थविग्रहः ।
ग्रन्थसेतुर्ग्रन्थहेतुर्ग्रन्थकेतुर्ग्रहाग्रगः ॥ १०२ ॥

ग्रन्थपूज्यो ग्रन्थगेयो ग्रन्थग्रथनलालसः।
ग्रन्थभूमिर्ग्रहश्रेष्ठो ग्रहकेतुर्ग्रहाश्रयः ॥ १०३ ॥

ग्रन्थकारो ग्रन्थकारमान्यो ग्रन्थप्रसारकः।
ग्रन्थश्रमज्ञो ग्रन्थाङ्गो ग्रन्थभ्रमनिवारकः ॥ १०४ ॥

ग्रन्थप्रवणसर्वाङ्गो ग्रन्थप्रणयतत्परः।
गीतं गीतगुणो गीतकीर्तिर्गीतविशारदः ॥ १०५ ॥

गीतस्फीतयशा गीतप्रणायो गीतचञ्चुरः।
गीतप्रसन्नो गीतात्मा गीतलोलो गतस्पृहः॥ १०६॥

गीताश्रयो गीतमयो गीततत्त्वार्थकोविदः।
गीतसंशयसंछेत्ता गीतसंगीतशासनः॥ १०७॥

गीतार्थज्ञो गीततत्त्वो गीतातत्त्वं गताश्रयः।
गीतासारोऽथ गीताकृद्‌गीताकृद्विघ्ननाशनः॥ १०८॥

गीताशक्तो गीतलीनो गीताविगतसंज्वरः ।
गीतैकदृग् गीतभूतिर्गीतप्रीतो गतालसः ॥ १०९ ॥

गीतवाद्यपटुर्गीतप्रभुर्गीतार्थतत्त्ववित् ।
गीतागीतविवेकज्ञो गीताप्रवणचेतनः ॥ ११० ॥

गतभीर्गतविद्वेषो गतसंसारबन्धनः ।
गतमायो गतत्रासो गतदुःखो गतज्वरः ॥ १११ ॥

गतासुहृद् गताज्ञानो गतदुष्टाशयो गतः।
गतार्तिगतसंकल्पो गतदुष्टविचेष्टितः ॥ ११२ ॥

गताहङ्कारसञ्चारो गतदर्पो गताहितः।
गतविघ्नो गतभयो गतागतनिवारकः ॥ ११३ ॥

गतव्यथो गतापायो गतदोषो गतेः परः।
गतसर्वविकारोऽथ गतगञ्जितकुञ्जरः ॥ ११४ ॥

गतकम्पितभूपृष्ठो गतरुग् गतकल्मषः।
गतदैन्यो गतस्तैन्यो गतमानो गतश्रमः॥ ११५॥

गतक्रोधो गतग्लानिर्गतम्लानो गतभ्रमः।
गताभावो गतभवो गततत्त्वार्थसंशयः॥ ११६॥

गयासुरशिरश्छेत्ता गयासुरवरप्रदः।
गयावासो गयानाथो गयावासिनमस्कृतः॥ ११७॥

गयातीर्थफलाध्यक्षो गयायात्राफलप्रदः।
गयामयो गयाक्षेत्रं गयाक्षेत्रनिवासकृत्॥ ११८॥

गयावासिस्तुतो गायन्मधुव्रतलसत्कटः।
गायको गायकवरो गायकेष्टफलप्रदः॥ ११९॥

गायकप्रणयी गाता गायकाभयदायकः।
गायकप्रवणस्वान्तो गायकः प्रथमः सदा॥ १२०॥

गायकोद्गीतसम्प्रीतो गायकोत्कटविघ्नहा ।
गानगेयो गायकेशो गायकान्तरसञ्चरः ॥ १२१ ॥

गायकप्रियदः शश्वद् गायकाधीनविग्रहः ।
गेयो गेयगुणो गेयचरितो गेयतत्त्ववित् ॥ १२२ ॥

गायकत्रासहा ग्रन्थो ग्रन्थतत्त्वविवेचकः ।
गाढानुरागो गाढाङ्गो गाढगङ्गाजलोऽन्वहम् ॥ १२३ ॥

गाढावगाढजलधिर्गाढप्रज्ञो गतामयः।
गाढप्रत्यर्थिसैन्योऽथ गाढानुग्रहतत्परः ॥ १२४ ॥

गाढश्लेषरसाभिज्ञो गाढनिर्वृतिसाधकः।
गङ्गाधरेष्टवरदो गङ्गाधरभयापहः ॥ १२५ ॥

गङ्गाधरगुरुर्गङ्गाधरध्यातपदः सदा।
गङ्गाधरस्तुतो गङ्गाधराराध्यो गतस्मयः ॥ १२६ ॥

गङ्गाधरप्रियो गङ्गाधरो गङ्गाम्बुसुन्दरः ।
गङ्गाजलरसास्वादचतुरो गाङ्गतीरयः ॥ १२७ ॥

गङ्गाजलप्रणयवान् गङ्गातीरविहारकृत् ।
गङ्गाप्रियो गाङ्गजलावगाहनपरः सदा ॥ १२८ ॥

गन्धमादनसंवासो गन्धमादनकेलिकृत् ।
गन्धानुलिप्तसर्वाङ्गो गन्धलुब्धमधुव्रतः ॥ १२९ ॥

गन्धो गन्धर्वराजोऽथ गन्धर्वप्रियकृत् सदा।
गन्धर्वविद्यातत्त्वज्ञो गन्धर्वप्रीतिवर्द्धनः ॥ १३० ॥

गकारबीजनिलयो गकारो गर्विगर्वनुत्।
गन्धर्वगणसंसेव्यो गन्धर्ववरदायकः ॥ १३१ ॥

गन्धर्वो गन्धमातङ्गो गन्धर्वकुलदैवतम्।
गन्धर्वगर्वसंछेत्ता गन्धर्ववरदर्पहा ॥ १३२ ॥

गन्धर्वप्रवणस्वान्तो गन्धर्वगणसंस्तुतः ।
गन्धर्वार्चितपादाब्जो गन्धर्वभयहारकः ॥ १३३ ॥

गन्धर्वाभयदः शश्वद् गन्धर्वप्रतिपालकः ।
गन्धर्वगीतचरितो गन्धर्वप्रणयोत्सुकः ॥ १३४ ॥

गन्धर्वगानश्रवणप्रणयी गर्वभञ्जनः ।
गन्धर्वत्राणसंनद्धो गन्धर्वसमरक्षमः ॥ १३५ ॥

गन्धर्वस्त्रीभिराराध्यो गानं गानपटुः सदा।
गच्छो गच्छपतिर्गच्छनायको गच्छगर्वहा ॥ १३६ ॥

गच्छराजोऽथ गच्छेशो गच्छराजनमस्कृतः।
गच्छप्रियो गच्छगुरुर्गच्छत्राणकृतोद्यमः ॥ १३७ ॥

गच्छप्रभुर्गच्छचरो गच्छप्रियकृतोद्यमः।
गच्छगीतगुणो गच्छमर्यादाप्रतिपालकः ॥ १३८ ॥

गच्छधाता गच्छभर्ता गच्छवन्द्यो गुरोर्गुरुः ।
गृत्सो गृत्समदो गृत्समदाभीष्टवरप्रदः ॥ १३९ ॥

गीर्वाणगीतचरितो गीर्वाणगणसेवितः ।
गीर्वाणवरदाता च गीर्वाणभयनाशकृत् ॥ १४० ॥

गीर्वाणगुणसंवीतो गीर्वाणारातिसूदनः ।
गीर्वाणधाम गीर्वाणगोप्ता गीर्वाणगर्वहृत् ॥ १४१ ॥

गीर्वाणार्तिहरो नित्यं गीर्वाणवरदायकः ।
गीर्वाणशरणं गीतनामा गीर्वाणसुन्दरः ॥ १४२ ॥

गीर्वाणप्राणदो गन्ता गीर्वाणानीकरक्षकः ।
गुहेहापूरको गन्धमत्तो गीर्वाणपुष्टिदः ॥ १४३ ॥

गीर्वाणप्रयुतत्राता गीतगोत्रो गताहितः ।
गीर्वाणसेवितपदो गीर्वाणप्रथितो गलत् ॥ १४४ ॥

गीर्वाणगोत्रप्रवरो गीर्वाणफलदायकः।
गीर्वाणप्रियकर्ता च गीर्वाणागमसारवित् ॥ १४५ ॥

गीर्वाणागमसम्पत्तिर्गीर्वाणव्यसनापहः ।
गीर्वाणप्रणयो गीतग्रहणोत्सुकमानसः ॥ १४६ ॥

गीर्वाणभ्रमसम्भेत्ता गीर्वाणगुरुपूजितः।
ग्रहो ग्रहपतिर्ग्राहो ग्रहपीडाप्रणाशनः ॥ १४७ ॥

ग्रहस्तुतो ग्रहाध्यक्षो ग्रहेशो ग्रहदैवतम् ।
ग्रहकृद् ग्रहभर्ता च ग्रहेशानो ग्रहेश्वरः ॥ १४८ ॥

ग्रहाराध्यो ग्रहत्राता ग्रहगोप्ता ग्रहोत्कटः ।
ग्रहगीतगुणो ग्रन्थप्रणेता ग्रहवन्दितः ॥ १४९ ॥

गवी गवीश्वरो गर्वी गर्विष्ठो गर्विगर्वहा ।
गवांप्रियो गवांनाथो गवीशानो गवांपतिः ॥ १५० ॥

गव्यप्रियो गवांगोप्ता गविसम्पत्तिसाधकः ।
गविरक्षणसंनद्धो गवां भयहरः क्षणात् ॥ १५१ ॥

गविगर्वहरो गोदो गोप्रदो गोजयप्रदः ।
गजायुतबलो गण्डगुञ्जन्मत्तमधुव्रतः ॥ १५२ ॥

गण्डस्थललसद्दानमिलन्मत्तालिमण्डितः ।
गुडो गुडप्रियो गण्डगलद्दानो गुडाशनः ॥ १५३ ॥

गुडाकेशो गुडाकेशसहायो गुडलड्डुभुक् ।
गुडभुग्गुडभुग्गण्यो गुडाकेशवरप्रदः ॥ १५४ ॥

गुडाकेशार्चितपदो गुडाकेशसखः सदा ।
गदाधरार्चितपदो गदाधरवरप्रदः ॥ १५५ ॥

गदायुधो गदापाणिर्गदायुद्धविशारदः ।
गदहा गददर्पघ्नो गदगर्वप्रणाशनः ॥ १५६ ॥

गदग्रस्तपरित्राता गदाडम्बरखण्डकः ।
गुहो गुहाग्रजो गुप्तो गुहाशायी गुहाशयः ॥ १५७ ॥

गुहप्रीतिकरो गूढो गूढगुल्फो गुणैकदृक् ।
गीर्गीष्पतिर्गिरीशानो गीर्देवी गीतसद्‍गुणः ॥ १५८ ॥

गीर्देवो गीष्प्रियो गीर्भूर्गीरात्मा गीष्प्रियंकरः ।
गीर्भूमिर्गीरसज्ञोऽथ गीःप्रसन्नो गिरीश्वरः ॥ १५९ ॥

गिरीशजो गिरौशायी गिरिराजसुखावहः ।
गिरिराजार्चितपदो गिरिराजनमस्कृतः ॥ १६० ॥

गिरिराजगुहाविष्टो गिरिराजाभयप्रदः ।
गिरिराजेष्टवरदो गिरिराजप्रपालकः ॥ १६१ ॥

गिरिराजसुतासूनुर्गिरिराजजयप्रदः ।
गिरिव्रजवनस्थायी गिरिव्रजचरः सदा ॥ १६२ ॥

गर्गो गर्गप्रियो गर्गदेवो गर्गनमस्कृतः ।
गर्गभीतिहरो गर्गवरदो गर्गसंस्तुतः ॥ १६३ ॥
गर्गगीतप्रसन्नात्मा गर्गानन्दकरः सदा ।
गर्गप्रियो गर्गमानप्रदो गर्गारिभञ्जकः ॥ १६४ ॥
गर्गवर्गपरित्राता गर्गसिद्धिप्रदायकः ।
गर्गग्लानिहरो गर्गभ्रमहृद् गर्गसंगतः ॥ १६५ ॥
गर्गाचार्यो गर्गमुनिर्गर्गसम्मानभाजनः ।
गम्भीरो गणितप्रज्ञो गणितागमसारवित् ॥ १६६ ॥

गणको गणकश्लाघ्यो गणकप्रणयोत्सुकः ।
गणकप्रवणस्वान्तो गणितो गणितागमः ॥ १६७ ॥
गद्यं गद्यमयो गद्यपद्यविद्याविशारदः ।
गललग्नमहानागो गलदर्चिर्गलन्मदः ॥ १६८ ॥
गलत्कुष्ठिव्यथाहन्ता गलत्कुष्ठिसुखप्रदः ।
गम्भीरनाभिर्गम्भीरस्वरो गम्भीरलोचनः ॥ १६९ ॥
गम्भीरगुणसम्पन्नो गम्भीरगतिशोभनः ।
गर्भप्रदो गर्भरूपो गर्भापदविनिवारकः ॥ १७० ॥

गर्भागमनसंनाशो गर्भदो गर्भशोकनुत्।
गर्भत्राता गर्भगोप्ता गर्भपुष्टिकरः सदा॥ १७१ ॥
गर्भाश्रयो गर्भमयो गर्भामयनिवारकः।
गर्भाधारो गर्भधरो गर्भसंतोषसाधकः॥ १७२ ॥
गर्भगौरवसंधानसाधनं गर्भवर्गहृत्।
गरीयान् गर्वनुद् गर्वमर्दी गरदमर्दकः॥ १७३ ॥
गरसंतापशमनो गुरुराज्यसुखप्रदः।
नाम्नां सहस्रमुदितं महद् गणपतेरिदम्॥ १७४ ॥

गकारादि जगद्वन्द्यं गोपनीयं प्रयत्नतः ।
य इदं प्रयतः प्रातस्त्रिसंध्यं वा पठेन्नरः ॥ १७५ ॥
वाञ्छितं समवाप्नोति नात्र कार्या विचारणा ।
पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम् ॥ १७६ ॥
विद्यार्थी लभते विद्यां सत्यं सत्यं न संशयः ।
भूर्जत्वचि समालिख्य कुङ्कुमेन समाहितः ॥ १७७ ॥
चतुर्थ्यां भौमवारे च चन्द्रसूर्योपरागके ।
पूजयित्वा गणाधीशं यथोक्तविधिना पुरा ॥ १७८ ॥

पूजयेद् यो यथाशक्त्या जुहुयाच्च शमीदलैः ।
गुरुं सम्पूज्य वस्त्राद्यैः कृत्वा चापि प्रदक्षिणाम् ॥ १७९ ॥
धारयेद् यः प्रयत्नेन स साक्षाद्गणनायकः ।
सुराश्चासुरवर्याश्च पिशाचाः किन्नरोरगाः ॥ १८० ॥
प्रणमन्ति सदा तं वै दृष्ट्वा विस्मितमानसाः ।
राजा सपदि वश्यः स्यात् कामिन्यस्तद्वशे स्थिराः ॥ १८१ ॥
तस्य वंशे स्थिरा लक्ष्मीः कदापि न विमुञ्चति ।
निष्कामो यः पठेदेतद् गणेश्वरपरायणः ॥ १८२ ॥

स प्रतिष्ठां परां प्राप्य निजलोकमवाप्नुयात्।
इदं ते कीर्तितं नाम्नां सहस्रं देवि पावनम् ॥ १८३ ॥
न देयं कृपणायाथ शठाय गुरुविद्विषे।
दत्त्वा च भ्रंशमाप्नोति देवतायाः प्रकोपतः ॥ १८४ ॥
इति श्रुत्वा महादेवी तदा विस्मितमानसा।
पूजयामास विधिवद् गणेश्वरपदद्वयम् ॥ १८५ ॥

*इति श्रीरुद्रयामले महागुप्तसारे शिवपार्वतीसंवादे*
*गकारादिश्रीगणेशसहस्रनामस्तोत्रं सम्पूर्णम् ॥*

॥ श्रीगणेशाय नमः ॥

# गकारादिश्रीगणेशसहस्त्रनामावलिः

१ ॐ गणेश्वराय नमः ।
२ ॐ गणाध्यक्षाय नमः ।
३ ॐ गणाराध्याय नमः ।
४ ॐ गणप्रियाय नमः ।
५ ॐ गणनाथाय नमः ।
६ ॐ गणस्वामिने नमः ।
७ ॐ गणेशाय नमः ।
८ ॐ गणनायकाय नमः ।
९ ॐ गणमूर्तये नमः ।
१० ॐ गणपतये नमः ।
११ ॐ गणत्रात्रे नमः ।
१२ ॐ गणञ्जयाय नमः ।
१३ ॐ गणपाय नमः ।
१४ ॐ गणक्रीडाय नमः ।

१५ ॐ गणदेवाय नमः।
१६ ॐ गणाधिपाय नमः।
१७ ॐ गणज्येष्ठाय नमः।
१८ ॐ गणश्रेष्ठाय नमः।
१९ ॐ गणप्रेष्ठाय नमः।
२० ॐ गणाधिराजे नमः।
२१ ॐ गणराजे नमः।
२२ ॐ गणगोप्त्रे नमः।
२३ ॐ गणाङ्गाय नमः।
२४ ॐ गणदैवताय नमः।
२५ ॐ गणबन्धवे नमः।
२६ ॐ गणसुहृदे नमः।
२७ ॐ गणाधीशाय नमः।
२८ ॐ गणप्रथाय नमः।
२९ ॐ गणप्रियसखाय नमः।
३० ॐ गणप्रियसुहृदे नमः।
३१ ॐ गणप्रियरताय नमः।
३२ ॐ गणप्रीतिविवर्धनाय नमः।

३३ ॐ गणमण्डलमध्यस्थाय नमः।
३४ ॐ गणकेलिपरायणाय नमः।
३५ ॐ गणाग्रण्ये नमः।
३६ ॐ गणेशानाय नमः।
३७ ॐ गणगीताय नमः।
३८ ॐ गणोच्छ्रयाय नमः।
३९ ॐ गण्याय नमः।
४० ॐ गणहिताय नमः।
४१ ॐ गर्जद्गणसेनाय नमः।
४२ ॐ गणोद्धताय नमः।
४३ ॐ गणभीतिप्रमथनाय नमः।
४४ ॐ गणभीत्यपहारकाय नमः।
४५ ॐ गणनार्हाय नमः।
४६ ॐ गणप्रौढाय नमः।
४७ ॐ गणभर्त्रे नमः।
४८ ॐ गणप्रभवे नमः।
४९ ॐ गणसेनाय नमः।
५० ॐ गणचराय नमः।

५१ ॐ गणप्राज्ञाय नमः।
५२ ॐ गणैकराजे नमः।
५३ ॐ गणाग्र्याय नमः।
५४ ॐ गणनाम्ने नमः।
५५ ॐ गणपालनतत्पराय नमः।
५६ ॐ गणजिते नमः।
५७ ॐ गणगर्भस्थाय नमः।
५८ ॐ गणप्रवणमानसाय नमः।
५९ ॐ गणगर्वपरीहर्त्रे नमः।
६० ॐ गणाय नमः।
६१ ॐ गणनमस्कृताय नमः।
६२ ॐगणार्चिताङ्घ्रियुगलाय नमः।
६३ ॐ गणरक्षणकृते नमः।
६४ ॐ गणध्याताय नमः।
६५ ॐ गणगुरवे नमः।
६६ ॐ गणप्रणयतत्पराय नमः।
६७ ॐ गणागणपरित्रात्रे नमः।
६८ ॐ गणाधिहरणोद्धुराय नमः।

६९ ॐ गणसेतवे नमः।
७० ॐ गणनुताय नमः।
७१ ॐ गणकेतवे नमः।
७२ ॐ गणाग्रगाय नमः।
७३ ॐ गणहेतवे नमः।
७४ ॐ गणग्राहिणे नमः।
७५ ॐ गणानुग्रहकारकाय नमः।
७६ ॐ गणागणानुग्रहभुवे नमः।
७७ ॐ गणागणवरप्रदाय नमः।
७८ ॐ गणस्तुताय नमः।
७९ ॐ गणप्राणाय नमः।
८० ॐ गणसर्वस्वदायकाय नमः।
८१ ॐ गणवल्लभमूर्तये नमः।
८२ ॐ गणभूतये नमः।
८३ ॐ गणेष्टदाय नमः।
८४ ॐ गणसौख्यप्रदात्रे नमः।
८५ ॐ गणदुःखप्रणाशनाय नमः।
८६ ॐ गणप्रथितनाम्ने नमः।

८७ ॐ गणाभीष्टकराय नमः।
८८ ॐ गणमान्याय नमः।
८९ ॐ गणख्याताय नमः।
९० ॐ गणवीताय नमः।
९१ ॐ गणोत्कटाय नमः।
९२ ॐ गणपालाय नमः।
९३ ॐ गणवराय नमः।
९४ ॐ गणगौरवदायकाय नमः।
९५ ॐ गणगर्जितसंतुष्टाय नमः।
९६ ॐ गणस्वच्छन्दगाय नमः।
९७ ॐ गणराजाय नमः।
९८ ॐ गणश्रीदाय नमः।
९९ ॐ गणाभयकराय नमः।
१०० ॐ गणमूर्धाभिषिक्ताय नमः।
१०१ ॐ गणसैन्यपुरःसराय नमः।
१०२ ॐ गुणातीताय नमः।
१०३ ॐ गुणमयाय नमः।
१०४ ॐ गुणत्रयविभागकृते नमः।

१०५ ॐ गुणिने नमः।
१०६ ॐ गुणाकृतिधराय नमः।
१०७ ॐ गुणशालिने नमः।
१०८ ॐ गुणप्रियाय नमः।
१०९ ॐ गुणपूर्णाय नमः।
११० ॐ गुणाम्भोधये नमः।
१११ ॐ गुणभाजे नमः।
११२ ॐ गुणदूरगाय नमः।
११३ ॐ गुणागुणवपुषे नमः।
११४ ॐ गौणशरीराय नमः।
११५ ॐ गुणमण्डिताय नमः।
११६ ॐ गुणस्रष्ट्रे नमः।
११७ ॐ गुणेशानाय नमः।
११८ ॐ गुणेशाय नमः।
११९ ॐ गुणेश्वराय नमः।
१२० ॐ गुणसृष्टजगत्संघाय नमः।
१२१ ॐ गुणसंघाय नमः।
१२२ ॐ गुणैकराजे नमः।

१२३ ॐ गुणप्रवृष्टाय नमः।
१२४ ॐ गुणभुवे नमः।
१२५ ॐ गुणीकृतचराचराय नमः।
१२६ ॐ गुणप्रवणसंतुष्टाय नमः।
१२७ ॐ गुणहीनपराङ्मुखाय नमः।
१२८ ॐ गुणैकभुवे नमः।
१२९ ॐ गुणश्रेष्ठाय नमः।
१३० ॐ गुणज्येष्ठाय नमः।
१३१ ॐ गुणप्रभवे नमः।
१३२ ॐ गुणज्ञाय नमः।
१३३ ॐ गुणसम्पूज्याय नमः।
१३४ ॐ गुणैकसदनाय नमः।
१३५ ॐ गुणप्रणयवते नमः।
१३६ ॐ गौणप्रकृतये नमः।
१३७ ॐ गुणभाजनाय नमः।
१३८ ॐ गुणिप्रणतपादाब्जाय नमः।
१३९ ॐ गुणिगीताय नमः।
१४० ॐ गुणोज्ज्वलाय नमः।

१४१ ॐ गुणवते नमः।
१४२ ॐ गुणसम्पन्नाय नमः।
१४३ ॐ गुणानन्दितमानसाय नमः।
१४४ ॐ गुणसंचारचतुराय नमः।
१४५ ॐ गुणसंचयसुन्दराय नमः।
१४६ ॐ गुणगौराय नमः।
१४७ ॐ गुणाधाराय नमः।
१४८ ॐ गुणसंवृतचेतनाय नमः।
१४९ ॐ गुणकृते नमः।
१५० ॐ गुणभृते नमः।
१५१ ॐ गुणाग्र्याय नमः।
१५२ ॐ गुणपारदृशे नमः।
१५३ ॐ गुणप्रचारिणे नमः।
१५४ ॐ गुणयुजे नमः।
१५५ ॐ गुणागुणविवेककृते नमः।
१५६ ॐ गुणाकराय नमः।
१५७ ॐ गुणकराय नमः।
१५८ ॐ गुणप्रवणवर्धनाय नमः।

१५९ ॐ गुणगूढचराय नमः।
१६० ॐ गौणसर्वसंसारचेष्टिताय नमः।
१६१ ॐ गुणदक्षिणसौहार्दाय नमः।
१६२ ॐ गुणलक्षणतत्त्वविदे नमः।
१६३ ॐ गुणहारिणे नमः।
१६४ ॐ गुणकलाय नमः।
१६५ ॐ गुणसंघसखाय नमः।
१६६ ॐ गुणसंस्कृतसंसाराय नमः।
१६७ ॐ गुणतत्त्वविवेचकाय नमः।
१६८ ॐ गुणगर्वधराय नमः।
१६९ ॐ गौणसुखदुःखोदयाय नमः।
१७० ॐ गुणाय नमः।
१७१ ॐ गुणाधीशाय नमः।
१७२ ॐ गुणलयाय नमः।
१७३ ॐ गुणवीक्षणलालसाय नमः।
१७४ ॐ गुणगौरवदात्रे नमः।
१७५ ॐ गुणदात्रे नमः।
१७६ ॐ गुणप्रदाय नमः।

१७७ ॐ गुणकृते नमः।
१७८ ॐ गुणसम्बन्धाय नमः।
१७९ ॐ गुणभृते नमः।
१८० ॐ गुणबन्धनाय नमः।
१८१ ॐ गुणहृद्याय नमः।
१८२ ॐ गुणस्थायिने नमः।
१८३ ॐ गुणदायिने नमः।
१८४ ॐ गुणोत्कटाय नमः।
१८५ ॐ गुणचक्रधराय नमः।
१८६ ॐ गौणावताराय नमः।
१८७ ॐ गुणबान्धवाय नमः।
१८८ ॐ गुणबन्धवे नमः।
१८९ ॐ गुणप्रज्ञाय नमः।
१९० ॐ गुणप्राज्ञाय नमः।
१९१ ॐ गुणालयाय नमः।
१९२ ॐ गुणधात्रे नमः।
१९३ ॐ गुणप्राणाय नमः।
१९४ ॐ गुणगोपाय नमः।

१९५ ॐ गुणाश्रयाय नमः।
१९६ ॐ गुणयायिने नमः।
१९७ ॐ गुणाधायिने नमः।
१९८ ॐ गुणपाय नमः।
१९९ ॐ गुणपालकाय नमः।
२०० ॐ गुणाहृततनवे नमः।
२०१ ॐ गौणाय नमः।
२०२ ॐ गीर्वाणाय नमः।
२०३ ॐ गुणगौरवाय नमः।
२०४ ॐ गुणवत्पूजितपदाय नमः।
२०५ ॐ गुणवत्प्रीतिदायकाय नमः।
२०६ ॐ गुणवद्गीतकीर्तये नमः।
२०७ ॐ गुणवद्बद्धसौहृदाय नमः।
२०८ ॐ गुणवद्वरदाय नमः।
२०९ ॐ गुणवत्प्रतिपालकाय नमः।
२१० ॐ गुणवद्गुणसंतुष्टाय नमः।
२११ ॐ गुणवद्रचितस्तवाय नमः।
२१२ ॐ गुणवद्रक्षणपराय नमः।

२१३ ॐ गुणवत्प्रणयप्रियाय नमः ।
२१४ ॐ गुणवच्चक्रसंचाराय नमः ।
२१५ ॐ गुणवत्कीर्तिवर्धनाय नमः ।
२१६ ॐ गुणवद्गुणचित्तस्थाय नमः ।
२१७ ॐ गुणवद्गुणरक्षकाय नमः ।
२१८ ॐ गुणवत्पोषणकराय नमः ।
२१९ ॐ गुणवच्छत्रुसूदनाय नमः ।
२२० ॐ गुणवत्सिद्धिदात्रे नमः ।
२२१ ॐ गुणवद्गौरवप्रदाय नमः ।
२२२ ॐ गुणवत्प्रवणस्वान्ताय नमः ।
२२३ ॐ गुणवद्गुणभूषणाय नमः ।
२२४ ॐ गुणवत्कुलविद्वेषिविनाश-करणक्षमाय नमः ।
२२५ ॐ गुणिस्तुतगुणाय नमः ।
२२६ ॐ गर्जत्प्रलयाम्बुदनिःस्वनाय नमः ।
२२७ ॐ गजाय नमः ।
२२८ ॐ गजपतये नमः ।
२२९ ॐ गर्जद्गजयुद्धविशारदाय नमः ।

२३० ॐ गजास्याय नमः।
२३१ ॐ गजकर्णाय नमः।
२३२ ॐ गजराजाय नमः।
२३३ ॐ गजाननाय नमः।
२३४ ॐ गजरूपधराय नमः।
२३५ ॐ गर्जद्गजयूथोद्धुरध्वनये नमः।
२३६ ॐ गजाधीशाय नमः।
२३७ ॐ गजाधाराय नमः।
२३८ ॐ गजासुरजयोद्धुराय नमः।
२३९ ॐ गजदन्ताय नमः।
२४० ॐ गजवराय नमः।
२४१ ॐ गजकुम्भाय नमः।
२४२ ॐ गजध्वनये नमः।
२४३ ॐ गजमायाय नमः।
२४४ ॐ गजमयाय नमः।
२४५ ॐ गजश्रिये नमः।
२४६ ॐ गजगर्जिताय नमः।
२४७ ॐ गजामयहराय नमः।

२४८ ॐ गजपुष्टिप्रदायकाय नमः।
२४९ ॐ गजोत्पत्तये नमः।
२५० ॐ गजत्रात्रे नमः।
२५१ ॐ गजहेतवे नमः।
२५२ ॐ गजाधिपाय नमः।
२५३ ॐ गजमुख्याय नमः।
२५४ ॐ गजकुलप्रवराय नमः।
२५५ ॐ गजदैत्यघ्ने नमः।
२५६ ॐ गजकेतवे नमः।
२५७ ॐ गजाध्यक्षाय नमः।
२५८ ॐ गजसेतवे नमः।
२५९ ॐ गजाकृतये नमः।
२६० ॐ गजवन्द्याय नमः।
२६१ ॐ गजप्राणाय नमः।
२६२ ॐ गजसेव्याय नमः।
२६३ ॐ गजप्रभवे नमः।
२६४ ॐ गजमत्ताय नमः।
२६५ ॐ गजेशानाय नमः।

२६६ ॐ गजेशाय नमः।
२६७ ॐ गजपुङ्गवाय नमः।
२६८ ॐ गजदन्तधराय नमः।
२६९ ॐ गुञ्जन्मधुपाय नमः।
२७० ॐ गजवेषभृते नमः।
२७१ ॐ गजच्छन्नाय नमः।
२७२ ॐ गजाग्रस्थाय नमः।
२७३ ॐ गजयायिने नमः।
२७४ ॐ गजाजयाय नमः।
२७५ ॐ गजराजे नमः।
२७६ ॐ गजयूथस्थाय नमः।
२७७ ॐ गजगञ्जकभञ्जकाय नमः।
२७८ ॐ गर्जितोज्झितदैत्यासवे नमः।
२७९ ॐ गर्जितत्रातविष्टपाय नमः।
२८० ॐ गानज्ञाय नमः।
२८१ ॐ गानकुशलाय नमः।
२८२ ॐ गानतत्त्वविवेचकाय नमः।
२८३ ॐ गानश्लाघिने नमः।

२८४ ॐ गानरसाय नमः।
२८५ ॐ गानज्ञानपरायणाय नमः।
२८६ ॐ गानागमज्ञाय नमः।
२८७ ॐ गानाङ्गाय नमः।
२८८ ॐ गानप्रवणचेतनाय नमः।
२८९ ॐ गानकृते नमः।
२९० ॐ गानचतुराय नमः।
२९१ ॐ गानविद्याविशारदाय नमः।
२९२ ॐ गानध्येयाय नमः।
२९३ ॐ गानगम्याय नमः।
२९४ ॐ गानध्यानपरायणाय नमः।
२९५ ॐ गानभुवे नमः।
२९६ ॐ गानशीलाय नमः।
२९७ ॐ गानशालिने नमः।
२९८ ॐ गतश्रमाय नमः।
२९९ ॐ गानविज्ञानसम्पन्नाय नमः।
३०० ॐ गानश्रवणलालसाय नमः।
३०१ ॐ गानायत्ताय नमः।

३०२ ॐ गानमयाय नमः।
३०३ ॐ गानप्रणयवते नमः।
३०४ ॐ गानध्यात्रे नमः।
३०५ ॐ गानबुद्धये नमः।
३०६ ॐ गानोत्सुकमनसे नमः।
३०७ ॐ गानोत्सुकाय नमः।
३०८ ॐ गानभूमये नमः।
३०९ ॐ गानसीम्ने नमः।
३१० ॐ गुणोज्ज्वलाय नमः।
३११ ॐ गानाङ्गज्ञानवते नमः।
३१२ ॐ गानमानवते नमः।
३१३ ॐ गानपेशलाय नमः।
३१४ ॐ गानवत्प्रणयाय नमः।
३१५ ॐ गानसमुद्राय नमः।
३१६ ॐ गानभूषणाय नमः।
३१७ ॐ गानसिन्धवे नमः।
३१८ ॐ गानपराय नमः।
३१९ ॐ गानप्राणाय नमः।

३२० ॐ गणाश्रयाय नमः।
३२१ ॐ गानैकभुवे नमः।
३२२ ॐ गानहृष्टाय नमः।
३२३ ॐ गानचक्षुषे नमः।
३२४ ॐ गणैकदृशे नमः।
३२५ ॐ गानमत्ताय नमः।
३२६ ॐ गानरुचये नमः।
३२७ ॐ गानविदे नमः।
३२८ ॐ गानवित्प्रियाय नमः।
३२९ ॐ गानान्तरात्मने नमः।
३३० ॐ गानाढ्याय नमः।
३३१ ॐ गानभ्राजत्सभाय नमः।
३३२ ॐ गानमायाय नमः।
३३३ ॐ गानधराय नमः।
३३४ ॐ गानविद्याविशोधकाय नमः।
३३५ ॐ गानाहितघ्नाय नमः।
३३६ ॐ गानेन्द्राय नमः।
३३७ ॐ गानलीनाय नमः।

३३८ ॐ गतिप्रियाय नमः।
३३९ ॐ गानाधीशाय नमः।
३४० ॐ गानलयाय नमः।
३४१ ॐ गानाधाराय नमः।
३४२ ॐ गतीश्वराय नमः।
३४३ ॐ गानवन्मानदाय नमः।
३४४ ॐ गानभूतये नमः।
३४५ ॐ गानैकभूतिमते नमः।
३४६ ॐ गानतानतताय नमः।
३४७ ॐ गानतानदानविमोहिताय नमः।
३४८ ॐ गुरवे नमः।
३४९ ॐ गुरूदरश्रोणये नमः।
३५० ॐ गुरुतत्त्वार्थदर्शनाय नमः।
३५१ ॐ गुरुस्तुताय नमः।
३५२ ॐ गुरुगुणाय नमः।
३५३ ॐ गुरुमायाय नमः।
३५४ ॐ गुरुप्रियाय नमः।
३५५ ॐ गुरुकीर्तये नमः।

३५६ ॐ गुरुभुजाय नमः।
३५७ ॐ गुरुवक्षसे नमः।
३५८ ॐ गुरुप्रभाय नमः।
३५९ ॐ गुरुलक्षणसम्पन्नाय नमः।
३६० ॐ गुरुद्रोहपराङ्मुखाय नमः।
३६१ ॐ गुरुविद्याय नमः।
३६२ ॐ गुरुप्राणाय नमः।
३६३ ॐ गुरुबाहुबलोच्छ्रयाय नमः।
३६४ ॐ गुरुदैत्यप्राणहराय नमः।
३६५ ॐ गुरुदैत्यापहारकाय नमः।
३६६ ॐ गुरुगर्वहराय नमः।
३६७ ॐ गुह्यप्रवराय नमः।
३६८ ॐ गुरुदर्पघ्ने नमः।
३६९ ॐ गुरुगौरवदायिने नमः।
३७० ॐ गुरुभीत्यपहारकाय नमः।
३७१ ॐ गुरुशुण्डाय नमः।
३७२ ॐ गुरुस्कन्धाय नमः।
३७३ ॐ गुरुजङ्घाय नमः।

३७४ ॐ गुरुप्रथाय नमः।
३७५ ॐ गुरुभालाय नमः।
३७६ ॐ गुरुगलाय नमः।
३७७ ॐ गुरुश्रिये नमः।
३७८ ॐ गुरुगर्वनुदे नमः।
३७९ ॐ गुरूरवे नमः।
३८० ॐ गुरुपीनांसाय नमः।
३८१ ॐ गुरुप्रणयलालसाय नमः।
३८२ ॐ गुरुमुख्याय नमः।
३८३ ॐ गुरुकुलस्थायिने नमः।
३८४ ॐ गुरुगुणाय नमः।
३८५ ॐ गुरुसंशयभेत्त्रे नमः।
३८६ ॐ गुरुमानप्रदायकाय नमः।
३८७ ॐ गुरुधर्मसदाराध्याय नमः।
३८८ ॐ गुरुधर्मनिकेतनाय नमः।
३८९ ॐ गुरुदैत्यकुलच्छेत्त्रे नमः।
३९० ॐ गुरुसैन्याय नमः।
३९१ ॐ गुरुद्युतये नमः।

३९२ ॐ गुरुधर्माग्रगण्याय नमः।
३९३ ॐ गुरुधर्मधुरन्धराय नमः।
३९४ ॐ गरिष्ठाय नमः।
३९५ ॐ गुरुसंतापशमनाय नमः।
३९६ ॐ गुरुपूजिताय नमः।
३९७ ॐ गुरुधर्मधराय नमः।
३९८ ॐ गौरधर्माधाराय नमः।
३९९ ॐ गदापहाय नमः।
४०० ॐ गुरुशास्त्रविचारज्ञाय नमः।
४०१ ॐ गुरुशास्त्रकृतोद्यमाय नमः।
४०२ ॐ गुरुशास्त्रार्थनिलयाय नमः।
४०३ ॐ गुरुशास्त्रालयाय नमः।
४०४ ॐ गुरुमन्त्राय नमः।
४०५ ॐ गुरुश्रेष्ठाय नमः।
४०६ ॐ गुरुमन्त्रफलप्रदाय नमः।
४०७ ॐ गुरुस्त्रीगमनोद्दामप्रायश्चित्त-निवारकाय नमः।
४०८ ॐ गुरुसंसारसुखदाय नमः।